भर्गो देवस्य रुद्रात्मने शिखा ॥ धीमहि ईश्वरात्मने कवचं ॥ धियो यो नः सदाशिवात्मने नेत्रं ॥ प
चोदयात् सर्वात्मने अस्त्रं ॥ कथांतरे तु ॥ ब्रह्मा विष्णुः क्रमाद्रुद्र ईश्वरश्च सदाशिवः ॥ सर्वात्मा
तेजसे ते च व्याहृत्यादि षडंगकं ॥ ॐ भूः ब्रह्मतेजसे हृद् इत्यादि ॥ आदिपदात् व्याहृतित्रयं
इत्युक्तं ॥ ततः प्रणवव्याहृतिसहितगायत्र्या त्रिव्यापकं वक्ष्ये ध्यानं ॥ मुक्ताविद्रुमहेमनील
धवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकां ॥ सावित्रीं व
रदाभयांकुशकशाः शुभ्रं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे ॥ आशा
अश्वादेस्ताडनीरज्जुः ॥ शुभ्रमिति कपालविशेषणं गुणो ॥ पाशः ॥ एवं ध्यात्वा ॥ लं पृथिव्यात्म
कं गंधं कल्पयामि ॥ हं आकाशात्मकं पुष्पं ॥ यं वाय्वात्मकं धूपं ॥ रं वह्न्यात्मकं दीपं ॥ वं अबा
त्मकं नैवेद्यं ॥ दशवारं मूलं प्रजाप्य एवं मनसा संपूज्य बाह्यपूजां कुर्यात् ॥ त्रिकोणाष्टद

© Dharmartha Trust J&K. Digitized by eGangotri

लभूपुरात्मकं यंत्रं ॥ पदार्थदर्शयेत्तु ॥ त्रिगुणेन विलसत्कर्णिकं सर्वतोभद्रमंडलं चतुरस्र
युतं यंत्रं त्रिकोणं श्रावस्य त्रिगुणितोपलक्षकलालप्रपंचसारे तथैवोक्तं इत्युक्तं ॥ पूर्वं किंचित् ॥
त्रिगुणेन त्रिकोणे ज्वलत्कर्णिकमष्टदलं चतुरस्रयुतं यंत्रमाहुः ॥ यथासंप्रदायं यंत्रं संपा
द्य तत्र सौरं पीठं पूजयेत् ॥ यथा ॥ मंडूकाय नमः ॥ कालाग्निरुद्राय नमः ॥ आधारशक्त्यै
नमः ॥ कूर्माय नमः ॥ धरायै नमः ॥ अमृतसागराय नमः ॥ श्वेतद्वीपाय नमः ॥ कल्पवृक्षे
भ्यो नमः ॥ मणिहर्म्याय नमः ॥ हेमपीठाय नमः ॥ इति संपूज्य ॥ आग्नेयादिकोणेषु प्रभू
ताय नमः ॥ विमलाय न ॥ साराय न ॥ समाराध्याय न ॥ मध्ये परमसुखाय नमः ॥ ततो मध्ये ॥
एवं अनंताय न ॥ पद्माय न ॥ आनंदमयकंदाय नमः ॥ संविन्नालाय नमः ॥ विकारमयकेसरे
भ्यो नमः ॥ प्रकृत्यात्मकपत्रेभ्यो नमः ॥ पंचाशद्वर्णकर्णिकायै नमः ॥ इंदुमंडलाय न ॥ वह्निमं ७

© Dharmartha Trust J&K. Digitized by eGangotri

पी

उल्लायनमः। सूर्यमंडलायनमः। एवं [illegible]ठदेवतां संपूज्य॥ पीठशक्तीः पूजयेत्॥ यथा॥ रां दीप्ता-
यैनमः। रीं सूक्ष्मायैनमः। रूं जयायैनमः। रें भद्रायैनमः। रैं विभूत्यै०। रों विमलायै०॥ रौं अमोघा-
यै०। रं विद्युतायै०। रः सर्वतोमुख्यैनमः॥ स्वपुरत आरभ्याष्टदिक्षु मध्ये च पूजयेत्॥ ततः ब्र-
ह्मविष्णुशिवात्मकाय सौराय योगपीठायनमः॥ इति पीठं संपूज्य॥ पीठकर्णिकायामादित्यं ॐ
खं खखोल्कायनम इति मंत्रेण पूजयेत्॥ ततः स्ववामे त्रिकोणषट्कोणवृत्तचतुरस्रात्मकं
यंत्रं विलिख्य तत्रास्त्रक्षालितमाधारं संस्थाप्य मं दशकलात्मने वह्निमंडलाय गायत्र्यर्घ्य-
पात्राधारायनमः॥ इत्याधारं संपूज्य॥ अस्त्रक्षालितं पात्रं संस्थाप्य अं द्वादशकलात्मने सूर्य-
मंडलाय गायत्र्यर्घ्यपात्रायनम इति पात्रं संपूज्य क्षं लं हं सं षं शं वं लं यं मं भं बं फं पं नं धं दं थं तं
णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इति वि

© Dharmartha Trust J&K. Digitized by eGangotri

गा

ओं मम मातृकां ॥ गायत्रीं च पठन् जलं संस्पृश्य ॐ पो ऽग्नय आत्मने चंद्रमंडलाय गायत्र्या अर्घ्यपा
त्रं कल्पयन् नमः ॥ इति जलं संपूज्य गंगे च यमुने चैवेत्यादि मंत्रेण अंकुशमुद्रया जले तीर्थान्या
वाह्य हृदयादि षडंगं चावाह्य षडंगमंत्रैरभ्यर्च्य शंखचक्रमुशलधेनुयोनिमुद्राः ॥ संदर्श्य मं
त्रस्य मुद्रया छादयित्वाष्टवारं मूलमंत्रं जपेत् ॥ अर्घ्योदकेनात्मानं पूजासाधनानि च त्रिः प्रोक्षे
त् ॥ ततः पीठात्मनोर्मध्ये विशेषार्घ्यस्थापनं ॥ सामान्यार्घ्यवत् ॥ धे चिन्तु ॥ अर्घ्यस्थापनोत्त
रं पीठपूजां कुर्वीत ॥ ततः गायत्र्या यंत्रे मूर्तिं परिकल्प्य पूर्वोक्तब्रह्मादिरूपादीन्स्मरतां प्रा
5 णान्नायम्य हृत्कमले चिद्रूपां रूपां वक्ष्यमाणवर्णसहितां ध्यात्वा ॥ मनसा पुष्पांजलिं
दत्वा हस्ते पुष्पांजलिं गृहीत्वा गायत्रीमंत्रेण वहन्नासापुटरंध्रेण बहिरानीय पुष्पसं
चये संयोज्य तत्र सावरणां ध्यात्वा यंत्रकल्पितमूर्तौ निवेश्य आवाहन्यादिमुद्राः ॥ ५

© Dharmartha Trust J&K. Digitized by eGangotri

प्रदर्शयेत्॥ आवाहिता भव॥ स्थापिता भव। सन्निहिता भव। संनिरुद्धा भव॥ संमुखीकृता भ
व सकलीकृता भव॥ अवगुण्ठिता भव। अमृतीकृता भव। परमीकृता भव॥ अथ प्राणप्रतिष्ठां कु
र्यात्॥ यथा॥ ओं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः गायत्र्याः प्राणा इह प्राणाः। ओं ह्रीं क्रों इत्यादि हंसः
इत्यंतमुक्त्वा गायत्र्या जीव इह स्थितः पुनः ओं ह्रीं क्रों हंसः गायत्र्याः सर्वेन्द्रियाणि पुनः ओं
ह्रीं क्रों हंसः गायत्र्या वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इ
ति मंत्रेण त्रिरावृत्त्या प्राणान्प्रतिष्ठाप्य ध्यायेत्॥ मुक्ताविद्रुमहेमादिश्लो० श्लोकप्रकारेण ध्या
त्वा मंत्रेण पाद्यादिपुष्पांतानुपचारान्कृत्वा पुष्पांजलिं दत्वा प्रसन्नां विभाव्य तदाज्ञया
आवरणपूजां कुर्यात्॥ गायत्र्यै नमः। सावित्र्यै नमः। सरस्वत्यै नमः॥ त्रिकोणे स्वाग्रतआ
रभ्य कोणत्रये प्रादक्षिण्येन पूजयेत्॥ ब्रह्मणे नमः॥ विष्णवे नमः॥ रुद्राय नमः॥ कोणे

© Dharmartha Trust J&K. Digitized by eGangotri

तराग्रे वह्निस्थितवह्निवरुणेशानादिक्षु पूजयेत् ॥ पुष्पांजलिं गृहीत्वा मूलमुच्चार्य अभिष्टसि
द्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनमिति पुष्पांजलिं
दत्वा देव्या हस्ते जलं क्षिपेत् ॥ इति प्रथमावरणं ॥ आदित्याय नमः ॥ रवये नमः ॥ भानवे
नमः ॥ भास्कराय नमः ॥ सूर्याय नमः ॥ वृत्तिकायामादित्यं संपूज्य परिधौ चतुर्दिक्षु र
व्यादीन् पूजयेत् ॥ उषायै नमः ॥ प्रज्ञायै नमः ॥ प्रभायै नमः ॥ संध्यायै नमः ॥ एता विदिक्षु ॥ मू
लेन पुष्पांजलिं गृहीत्वा अभीष्टसिद्धिमित्यादि पूर्ववत् ॥ द्वितीयावरणार्चनमिति विशेषः
इति द्वितीयावरणं ॥ ब्रह्मणे हृदयाय नमः ॥ विष्णवे शिरसे स्वाहा रुद्राय शिखायै वषट् ॥ ई
श्वराय कवचाय हुं ॥ वह्निस्थितअग्नीशासुरवायव्येषु केसरेषु संपूज्य ॥ सदाशिवाय नेत्रत्र
याय वौषट् ॥ इति देव्याः पुरतः संपूज्य सर्वात्मने अस्त्राय फट् इति पुरतश्चारभ्य केसरे ६

6

षुचवतु दिक्षु पूजयेत्॥ मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰ तृतीयावरणार्चनं॥ इति पूर्ववत्॥ इति तृतीयावरणं॥ प्रह्लादिन्यैनमः॥ प्रभायैनमः॥ नित्यायैनमः॥ विश्वंभरायैनमः॥ विलासिन्यैनमः॥ प्रभावत्यैनमः॥ जयायैनमः॥ शान्त्यै॰॥ स्वाग्रत आरभ्याष्टसु दलेषु॥ मूलेन पुष्पांजलिं गृहीत्वा॥ अभिष्टेत्यादि चतुर्थावरणार्चनमिति॥ पूर्ववत्॥ इति चतुर्थावरणं॥ कान्तायैनमः॥ दुर्गायै॥ सरस्वत्यैनमः॥ विश्वरूपायै॰॥ विशालायै॰॥ ईशायै॰॥ व्यापिन्यै॰॥ विमलायै॰॥ पूर्वत आरभ्य दलेष्वेव पूजयेत्॥ मूलेन पुष्पांजलिं गृहीत्वा अभिष्टपंचमावरणार्चनमित्यादि॥ इति पंचमावरणं॥ तमोपहारिण्यै॰॥ सूक्ष्मायै॰॥ विश्वयोन्यै॰॥ जयावहायै॰॥ पद्मालयायै॰॥ परायै॰॥ शोभायै॰॥ भद्ररूपायै॰॥ पूर्वत आरभ्य दलेष्वेव॥ मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰॥ षष्ठमावरणार्चनमित्यादि॥ इति षष्ठमावरणं॥ ब्राह्म्यै॰॥ मा

© Dharmartha Trust J&K. Digitized by eGangotri

हेश्वर्यै ॰ ॥ कौमार्यै ॰ वैष्णव्यै नमः । वाराह्यै ॰ ॥ इन्द्राण्यै ॰ ॥ चामुण्डायै ॰ ॥ अरुणाय नमः ॥ पुरत आ
रभ्य दक्षिणाग्रेषु पूजयेत् ॥ मूलेन पुष्पांजलिं गृहीत्वा अभिष्ट॰ सप्तमावरणार्चनमित्यादि पूर्वव
त् ॥ पद्मपादाचार्योस्तु ॥ महालक्ष्मीमष्टमीं संपूज्य पुरतोऽरुणमर्चयेत् ॥ इति अरुणपूजा म
धिकामाङ्कुः ॥ इति सप्तमावरणं ॥ ततो बहिः चन्द्राय ॰ ॥ बुधाय ॰ ॥ बृहस्पतये ॰ ॥ शुक्राय ॰ ॥ पुरत
आरभ्य चतुर्दिक्षु ॥ भौमाय ॰ ॥ शनैश्चराय ॰ ॥ राहवे ॰ ॥ केतवे ॰ ॥ विदिक्षु मूलेन ॥ पुष्पांजलिं
7 गृहीत्वा अभिष्ट॰ अष्टमावरणार्चनमित्यादि ॥ इत्यष्टमावरणं ॥ इन्द्राय नमः ॥ अग्नये न
मः यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ सोमाय नमः ॥ ईशानाय ॰ ॥
॥ इत्यष्टमावर्णं ॥ चतुरस्रे ॥ प्रासिद्धपूर्वादिदिक्षु ॥ अनन्ताय नमः ॥ पश्चिमनैर्ऋतमध्ये ॰ ॥ ब्रह्म
णे नमः पूर्वेशानमध्ये मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰ नवमावरणार्चनमित्यादि ॥ ०॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ इति नवमावरणं ॥ वज्राय नमः ॥ शक्तये । दंडाय नमः । खड्गाय । पाशाय । अंकुशाय ॥
गदायै । त्रिशूलायै । चक्राय । पद्माय ॥ पूर्ववत् सज्जयेत् ॥ मूलेन पुष्पांजलिं दत्त्वा अभिष्टसि
द्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं दशमावरणार्चनमिति देव्या हस्ते जलं
दद्यात् ॥ इति दशमावरणं ॥ ततः अवशिष्टपूजां समाप्य पुष्पाञ्जलिं दत्त्वा देवीं प्रसन्नां विभा
व्य स्वात्मानं देवीस्वरूपं ध्यात्वा(?) सपूज्य ऋष्यादिन्यासं कृत्वा देवीगुरुमंत्रात्मनां ज्योतीरूपे
णैक्यं विभावयेत् ॥ एवं यावत्प्रयोगसमाप्तिस्तावत्प्रत्यहं पूजां कुर्यात् ॥ इति पूजाविधिः
॥ अथ जपः ॥ तिथ्यादि संकीर्त्य संकल्पितपुरश्चरणसमाप्तिपर्यंतं अमुकसंख्याकजपम
हं करिष्ये ॥ इति संकल्प्य देवगुर्वादिस्मरणं विधाय प्राणायामत्रयं कृत्वा पूर्वोक्तऋष्यादि
न्यासान् कृत्वा ऽस्त्राक्षोप(?) षडंगमात्र विधाय देवतां ध्यायन् जपं कुर्यात् ब्राह्मणद्वारा करणेन तु

© Dharmartha Trust J&K. Digitized by eGangotri

यजमानवृतो ब्राह्मण एवैकः शुद्धदेशे कुशाद्यासने उपविश्य पवित्रपाणिराचम्य प्राणा
नायम्य आसनविधिं भूतोत्सारणादिकंसाभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासान्वि
धाय जपं संकल्प्य त्रिः प्राणानायम्य ऋष्यादिस्मरणपूर्वकं ऋष्यादिन्यासान्विधाय स
वितारं देवतां ध्यात्वा संस्कृतां मालां प्रोक्ष्य ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ॥ चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ ह्रीं अक्षमालायै नमः ॥ इति संप्रार्थ्य ॐ अ
विघ्नं कुरु माले त्वं जपकाले सदा मम ॥ त्वं बीजं सर्वमंत्राणामिष्टसिद्धिकरी च वेति ना
मादाय हृदयसमीपे मालां धारयन्मध्यमामध्यपर्वणि निधायोन्नतगात्रः स्वदस्व
टादिशं न स्मरन्कुर्वन्मध्यांदिनाचघिलरायां सार्द्धप्रहरत्रयपर्यन्तं जपेत् ॥ अंते पुनः
प्रणवमुच्चार्य त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं

© Dharmartha Trust J&K. Digitized by eGangotri

च सर्वदा ॥ ह्रीं सिद्ध्यै नमः ॥ इति मालां शिरसि निधाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्म
त्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादाद्धृदि स्थिता ॥ इति जपसमर्पणं ॥ पुनर्न्यासान्कुर्याद्
॥ इति जपविधिः ॥ एवं समाप्ते जपे तिथ्यादि संकीर्त्य कृतैतद्गायत्रीपुरश्चरणसांगतासि
द्ध्यर्थं होमं करिष्ये इति संकल्प्य यथाचारं गणपतिपूजनादि कलशकुलिकसदस्यादिव
रणान्तं कुर्यात् ततो यथोक्तविधिना अग्निं प्रतिष्ठाप्य ग्रहावाहनादि कलशस्थापनान्त
कृत्वा अस्य मात्रे गायत्रीपुरश्चरणहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इति संक
ल्प्य अस्मिन्नन्वाहिते अग्नावित्यादि चक्षुषी आज्येनेत्यन्ते अत्र प्रधानं आदित्यादिग्रहा
न् अर्कादि जातियसमिदाहुतिभिश्चरु वाज्याहुतिभिश्चाष्टसंख्याकाभिः पुनस्त
त्र प्रधानं सवितारं सहस्रत्रयसंख्याकाभिर्दुग्धमिश्रौदनाहुतिभिस्त्वाचतिभिस्तिला

© Dharmartha Trust J&K. Digitized by eGangotri

९ हुतिभिस्स्रावतीभिर्दूर्वाभिस्स्रावतीभिरर्कसमिद्भिस्स्रावतीभिरश्वत्थसमिद्भिस्स्रावतीभि
र्वटसमिद्भिस्स्रावतीभिरुदुंबरसमिद्भिस्स्रावतीभिः प्लक्षसमिद्भिराचरणं देवताश्चै
कैकयाघृतान्नं तिलाहुत्याशेषेणैव साधितं । पर्यग्निकरणं कालेषु वेदादिभिः सहाज्यस्य
पर्यग्निकरणं ॥ यथान्वाधानं काले इदं सवित्रादिभ्यो न मम । इदं सवित्रे इत्येवं त्या
गः ॥ दूर्वात्रयस्यैका हुतिः ॥ काले बालिनौ दोदिपूर्णां हुत्वा तन्त्रशेषं समाप्य समुद्र
ज्येष्ठादित्यभिषेकान्ते प्रत्येकं धेनुनिष्क्रयसंकल्पः ॥ विसर्जनादि ब्राह्मणभोजनं सं
कल्प्यान्ते कर्म ईश्वरार्पणं कुर्यात् ॥ पदार्थादर्शे तु ॥ क्षीरं ॥ ओदनं ॥ तिलाः ॥ दूर्वाः ॥ इ
ति द्रव्यचतुष्टयं ॥ क्षीरद्रुमाश्वत्थोदुंबरप्लक्षवटाः एवमष्टद्रव्याणि प्रत्येकं त्रित्रि
सहस्रं इत्युक्तं ॥ प्रपंचसारे तु ॥ पायसघृततिलदूर्वाक्षीरद्रुमचतुष्टयं एवमष्टौ उक्ता ऐ

© Dharmartha Trust J&K. Digitized by eGangotri

नि॥ इति होमविधी॥ एवं होमं समाप्य जले देवं संपूज्य होमदशांशेन गायत्र्यां ते सविता
रं तर्पयामि नमः इति तर्पणं कार्यं॥ तर्पणदशांशेन गायत्र्यां ले आत्मानमभिषिंचामि नम
इति स्वमूर्ध्नि मार्जनं कार्यं॥ असंभवे द्विगुणो जपः। यद्यदंगं विहीयेत तत्तस्य स्याद्द्विगुणो ज
पा इति वचनात्॥ अभिषेकदशांशेन ब्राह्मणभोजनं। अशक्तौ। शक्तस्तु यथेष्टं ब्राह्मण
भोजनं कुर्यात्॥ ब्राह्मणभोजनेनैव देवता प्रसीदति॥ ब्राह्मणान्दक्षिणादिभिः संतोष
यित्वाशिषो गृहीत्वा पुरश्चरणं पूर्णमस्त्विति वाचयित्वा कर्मेश्वरार्पणं कुर्यात्॥ आ
रंभप्रभृति यावत्समाप्ति कर्त्ता ब्राह्मणैः सह हविष्याशी सत्यवागधःशायी भवेत्॥
यज्जाग्रत इति शिवसंकल्पमंत्रांश्च स्थिरः पठित्वा प्रत्यहं शयीत॥ अथ मालासंस्कारः॥ कु
शोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अं आं इत्यादीनि क्षं इत्यंतानि मातृकाक्षरा

© Dharmartha Trust J&K. Digitized by eGangotri

ऐं अष्टद्रव्याकारतया स्थापितेषु नवसु अश्वत्थपत्रेषु स्थापित मालां यां विन्यस्य ॐ स
द्योजातं॰ ॐ वामदेवाय॰ ॐ अघोरेभ्यः॰ ॐ तत्पुरुषाय॰ ॐ ईशानः॰ । इति पंचमंत्रान् ज
प्त्वा एतेषां मध्ये प्रथमेन पंचगव्येन शीतलजलेन च मालां प्रक्षाल्य द्वितीयेन
चंदनादिना विघृष्य ॥ तृतीयेन मालां धूपयित्वा चतुर्थेन चंदनकुसुमादिना लेप
यित्वा पंचमेन प्रतिमणिं शतसंख्यं स्पृष्ट्वा ॥ प्रत्येकं मंत्रयेन्मंत्री पंचमेन सद्योजातस्पृष्टेति व
चनात् अभिमंत्रयेत् ॥ अघोरेभ्य इति मंत्रेण मेरुं शतवार मालायां वा शतजपः । समु
द्रायमालायामपि वृत्तपंचमेनैव सत्केन न्यासातान्यत्नेन मंत्रयेदिति वचनात् अभिमंत्र्य ए
तैरेव पंचभिर्मंत्रैर्मालां पंचोपचारैरिष्टदेवतावत् पूजयेत् ॥ इति मालासंस्कारः ॥ एवं च
तुर्विंशति लक्षजपात्मकं पुरश्चरणं मंत्रस्योक्तं शास्त्रावधौ तु ॥ परिजातोदाहृते कृत्स्निधा २०

10

© Dharmartha Trust J&K. Digitized by eGangotri

नेलु॥ अथवेदादिगीतायाः प्रसादजननं विधिं॥ गायत्र्याः संप्रवक्ष्यामि धर्मकामा
र्थमोक्षदं॥ मध्याह्नेमितभुक् मौनी त्रिःस्नानार्चनतत्परः। जपेल्लक्षत्रयं धीमान्नान्य
द्ध्यानसत्क्रिय॥ इति त्रिलक्षं पुरश्चरणमुक्तं कृत्वा॥ कृचतुर्गुणे जपो विहितः॥ अतो द्वाद
शलक्षैः पुरश्चरणं भवति॥ तत्र संकल्पस्तथैवोक्तः॥ द्वादशलक्षात्मकं पुरश्चरणं करिष्ये
इति सविस्तारं द्वादशसहस्रतिलाहुतिभिः संतर्पयेदिति च तन्त्रे चोक्तं॥ इति श्रीरुणकरना
रायणभट्टात्मज श्रीकृष्णभट्टतः शारदातिलकानुसारी गायत्रीपुरश्चरणप्रयोगः सं
वत् १९१७ रामभुवस्तुभूसंख्ये वत्सरे व्ययसंज्ञके माघमासे सितपक्षेऽष्टम्यां गुरुवा
सरे श्रीकृष्णोव्ययवल्काश्यां पौरश्चरणिकं विधिं॥ अथ मुद्रालक्षणानि॥ अनामांगुष्ठसं
लग्नांगुष्ठानां जलिरीरिता। देवानां नकुरस्यैषा मुद्रावाहनसंज्ञिका॥१॥ अधोमुखीकृता

© Dharmartha Trust J&K. Digitized by eGangotri

सैवप्रोक्तास्थापनकर्मणि ॥१॥ आश्लिष्टमुष्टियुगलप्रोन्नतांगुष्ठयुग्मका । संनिधाने
समुद्दिष्टा मुद्रेयं तंत्रवेदिभिः ॥२॥ अंगुष्ठगर्भिणी सैव संनिरोधे समीरिता ॥३॥ उत्तानमुष्टि
युगलासंमुखीकरणी मता ॥४॥ देवतांगेषडंगानां न्यासः स्यात्सकलीकृतिः ॥५॥ सव्यहस्त
कृतामुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवगुंठनमुद्रेयमभितो भ्रामिता सती ॥७॥ वामांगुली
नां मध्येषु दक्षिणांगुलीरथ । नियोजतर्जनीं दक्षां मध्यमया वामया तथा । दक्षमध्यमया
वामां तर्जनीं च नियोजयेत् । वामयानामया दक्षां कनिष्ठां च नियोजयेत् । दक्षयानाम
या वामां कनिष्ठां विनियोजयेत् । विहिताधोमुखी चैषा धेनुमुद्रा प्रकीर्तिता ॥८॥ अन्यो
न्यग्रथितांगुष्ठा प्रसारितकरांगुली ॥ महामुद्रेयमुदिता परमीकरणे बुधैः ॥९॥ प्रयोज
येजयेदिमां मुद्रां देवतायागकर्मणि ॥ वामांगुष्ठं तु संगृह्य दक्षहस्तस्य मुष्टिना ॥ कृत्वो ११

त्तानं दक्षमुष्टिमंगुष्ठं तु प्रसारयेत् ॥ वामांगुष्ठस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः । दक्षि
णांगुष्ठेन लग्नामुद्रा शंखस्य भूतिदा ॥ ३ ॥ हस्तौ तु संमुखौ कृत्वा संलग्नौ सुप्रसारितौ ॥ क
निष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्रसन्निभा ॥ ४ ॥ मुष्टी कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणं
॥ कुर्यान्मुसलमुद्रेयं सर्वविघ्ननिवारिणी ॥ ५ ॥ मिथः कनिष्ठिके बध्वा तर्जनीभ्यामनामि
के ॥ अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ॥ अंगुष्ठाग्रद्वयं न्यसेद्योनिमुद्रेयमीरिता
॥ ६ ॥ वामोपरिष्टात्संस्थाप्य दक्षहस्तं प्रसारयेत् ॥ अंगुष्ठौ तु तयोः पार्श्वे मत्स्यमुद्रेय
मीरिता ॥ ७ ॥ इति मुद्रालक्षणानि ॥ संवत् १९१७ नाम माघशुदी १ वार शनि ॥ श्री ॥ ॥

१२

12

धर्म:

वज्ञा पैतिः

२०

© Dharmartha Trust J&K. Digitized by eGangotri